# SANSKRIT

## (Second Language)

***Maximum Marks : 80***

***Time Allowed : Three Hours***

1. *Answers to this Paper must be written on the paper provided separately.*
2. *You will **not** be allowed to write during the first **15** minutes.*
3. *This time is to be spent in reading the question paper.*
4. ***The time given at the head of this Paper is the time allowed for writing the answers.***

5. *This paper comprises two Sections; **Section A** and **Section B.***
6. *Attempt **all** the questions from **Section A**.*
7. *Attempt **four** questions from **Section B**, answering at least **one** question each from the **two** books you have studied and **any two** other questions from the same books that you have compulsorily chosen.*
8. *The intended marks for questions or parts of questions are given in brackets [ ].*

***Instruction for the Supervising Examiner***

*Kindly read aloud the instructions given above to all the candidates present in the Examination Hall.*


© *Copyright reserved.*

## SECTION—A (40 Marks)

*Attempt **all** questions from this section.*

**Question 1**

Write a short composition in **Sanskrit** of **150-200** words on any **one** of the following topics :— [15]

अधोलिखितेषु विषयेषु एकं विषयम् आधृत्य **150–200** शब्दपरिमितं लघुनिबन्धं **संस्कृतभाषया** लिखत :—

(i) धार्मिकोत्सव: तव अतीव प्रिय: अस्ति। तम् उत्सवं कथम् आचरति ? तस्य विशेषता च का इति उक्त्वा एकं निबन्धं लिखतु।

(ii) परोपकारेण जीवनं सार्थकं भवति। आत्मतृप्ति: अपि लभ्यते इति चिन्तयित्वा परोपकारविषये एकां कथां लिखत।

(iii) संस्कृते बहूनि काव्यानि नाटकानि च सन्ति। बहव: कवय: अपि। तेषां कवीनां तथा कृतीनां विषये लघु निबन्धं लिखत।

(iv) ग्रन्था: ज्ञानवर्धका:। तेषाम् आलय: ग्रन्थालय: अत: ग्रन्थालयम् अधिकृत्य निबन्धं लिखत।

(v) (Picture Composition) प्रस्तुतं चित्रम् आधृत्य संस्कृतभाषया निबन्धं लिखत।



**Question 2**

Write a letter in **Sanskrit** approximately **120** words on any **one** of the following topics :— [7]

अधोलिखितयोः विषययोः **एकं** विषयम् आधृत्य पत्रमेकं **संस्कृतभाषया** लिखत :—

(i) तव अग्रजः पठनार्थं पूनानगरे वसति। सः परीक्षायां प्रथमस्थानं लब्ध्वा स्वर्णपदकविभूषितः। अतः तम् अभिनन्द्य पत्रं लिखत।

**अथवा**

(ii) भवतां प्रदेशस्य जलसमस्यां विशदीकृत्य जलमण्डल्याः अधिकारिणं प्रति पत्रमेकं लिखत।

**Question 3**

Read the passage given below and answer in **Sanskrit** the questions that follow, using your own words as far as possible :—

अधोदत्तं अनुच्छेदं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि यथासंभवं स्ववाक्यैः **संस्कृतभाषया** लिखत :—

त्रिंशद्वर्षेभ्यः पूर्वतनी घटना इयम्। तद् विद्यालये कक्ष्यारम्भदिनम्। विद्यार्थिनः विद्यार्थिन्यश्च समसंख्याः आसन्। छात्राणां स्वागताय कश्चन सभाकार्यक्रमः आयोजितः। तत्र प्राचार्यस्य स्वागतभाषणम् एवम् आसीत् –

भवद्भ्यः स्वागतव्याहरणात् पूर्वं कथाम् इमां श्रावयामि– कश्चित् राजा। तेन अनावृष्टिनिवारणयज्ञाय किञ्चन अतिविरलं फलम् अपेक्षितम् अभवत्। तच्च फलम् आसीत् दूरस्थे अरण्ये विद्यमाने कस्मिंश्चित् आश्रमे। सैन्येन सह राजा तम् आश्रमं गतवान्। आश्रमे ऋषिवर्यं दृष्ट्वा तं तत् फलं ददातु इति प्रार्थितवान्। राजा स्वयमेव आगतवान् इति कारणतः सन्तुष्टः ऋषिः तम् आदरेण सत्कृतवान्। तत् फलम् आनाय्य राज्ञे दत्तवान्। सत्कार-स्वीकरणसमये राजा सर्वम् आश्रमं सम्यक् परिशीलितवान्। तत्र अनेकाः पयस्विन्यः धेनवः, अत्यमूल्यानि उपकरणानि च आसन्। तत्र नवयौवना सुन्दरी च काचित् ऋषिकन्या आसीत्। 'सर्वमेतत् वनवासिनः ऋषेः किमर्थम् ? यदि एतानि मम प्रासादे भवन्ति तर्हि शोभन्ते' इति वदन् सः धेनूः उपकरणानि च स्वीकृत्य तां ऋषिपुत्रीं अपि गृहीत्वा ततः गतवान्। सः ऋषिः अतीव दुःखितः जातः। तथापि दुःखं सहमानः पश्यति यत् तेन राज्ञे दत्तं फलं तत्रैव अस्ति। राजा तदेव त्यक्त्वा गतः आसीत्। तदा ऋषिः अचिन्तयत् "अपेक्षितं कर्म अकुर्वन्, अनपेक्षितं सर्वं कृत्वा गतवान् सः राजा" इति।

कथां समाप्य सः प्राचार्यः पृष्टवान् – 'प्रियछात्राः ! तस्य राज्ञः विषये भवतां मनसि कीदृशः अभिप्रायः समुत्पन्नः ?' इति।

सर्वे छात्रा: "तेन कृत: अक्षम्य: अपराध: ! असाधु, असाधु। यदर्थम् आगतवान् तदेव स: विस्मृतवान् अयोग्य: स:" इत्यादि उच्चै: उक्तवन्त:। कोलाहल: स्थगित: अभवत्। तदानीं प्राचार्य: विवरणं कृतवान्।

भवद्भि: इयं घटना सम्यक् चिन्तिता अस्ति। अहं चिन्तयामि यत् भवत्सु के अपि तेन राज्ञा कृताम् असाधुतां न कुर्यु: इति ! भवन्त: विद्यालयम् आगता: सन्ति। अत्र आगमनं तु न कालहरणाय। न आन्दोलनकरणाय। न वा राजनैतिकव्यवहाराय। तादृशकार्यार्थं तु अन्यवेदिका: अन्यस्थानानि वा भवन्ति। कृपया सर्वे स्मृतिपथे स्थापयन्तु यत् भवन्त: आगता: सन्ति ज्ञानार्जनाय ! पदवीप्राप्तये च ! भवद्भ्य: सर्वेभ्य: अपि हार्दं स्वागतम्। शुभं भवतु।

(i) विद्यालये सभाकार्यक्रम: किमर्थम् आयोजित: ? क: स्वागतभाषणम् अकरोत् ? [2]

(ii) राजा किमर्थम् आश्रमं गतवान् ? आश्रमात् किं किम् आनीतवान् ? [2]

(iii) छात्रा: किमर्थम् आगता: ? किमर्थं न इति प्राचार्य: वदति ? [2]

(iv) राजा किं त्यक्त्वा गत:। तदा ऋषि: किमित्यचिन्तयत् ? [2]

(v) छात्रा: किमिति कोलाहलं कृतवन्त: ? [2]

**Question 4**

Answer the following questions according to the instructions given :— [8]

अधोलिखितान् प्रश्नान् यथानिर्देशम् उत्तरयत :—

(i) त्वम् एतत् कार्यं करोषि – अस्य लृट्लकाररूपम् एवं भवति।

(a) त्वम् एतत् कार्यम् अकरोत्

(b) त्वम् एतत् कार्यं करिष्यति

(c) त्वम् एतत् कार्यं करिष्यसि

(d) त्वम् एतत् कार्यं करिष्यामि

(ii) यमुनातीरम् इत्यस्य विग्रहवाक्यम् एवं भवति।

(a) यमुनां तीरम्

(b) यमुनाया: तीरम्

(c) यमुनया तीरम्

(d) यमुनायां तीरम्

(iii) अहं चित्राणि पश्यामि। अस्य वाक्यस्य वाच्यपरिवर्तनं एवं भवति।

(a) मया चित्राणि दृश्यन्ते

(b) मया चित्राणि दृश्यते

(c) मया चित्राणि दृश्ये

(d) मया चित्राणि दृश्येते

(iv) जननी + अवदत् अनयोः योजनम् एवम् अस्ति।

(a) जनन्ववदत्

(b) जनन्यवदत्

(c) जन्यवदत्

(d) जननीवदत्

(v) अत्र वाक्यस्य शुद्धं रूपम् एवमस्ति।

(a) बालिकायां मधुरं रोचते

(b) बालिकायै मधुरं रोचते

(c) बालिकया मधुरं रोचते

(d) बालिका मधुरं रोचते

(vi) प्र + नम् + ल्यप् – अस्य प्रकृतिप्रत्यययोजनेन एवमस्ति।

(a) प्रनम्यप्

(b) प्रणमन्

(c) प्रणत्वा

(d) प्रणम्य

(vii) च छ ज झ वर्णानाम् उत्पत्तिस्थानम् एतदस्ति।

(a) कण्ठः

(b) मूर्धा

(c) तालु

(d) ओष्ठौ

(viii) "भार्गवः" अस्य विभजनम् एवं भवति।

(a) भृगोः भावः

(b) भृगोः इदम्

(c) भृगोः अपत्यं स्त्री

(d) भृगोः अपत्यं पुमान्

## SECTION—B (40 Marks)

*Questions from only **two** of the following textbooks are to be answered.*
*Attempt **four** questions from this section.*
*You must answer at least **one** question from each of the **two** books,*
*you have studied and **any two** other questions.*

## संस्कृतवाणी भाग—4

### दैवानुग्रहम्

**Question 5**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

कतिपय दिवसानन्तरं स्थूलदत्तस्य सुतायाः विवाहोत्सवः आगतः। उत्सवार्थं तस्य सम्बन्धिनः आगतवन्तः। तदा हरिशर्मा मनसि एवम् अचिन्तयत्। 'अहं विवाहसमये आकण्ठं भोजनं करिष्यामि' इति। तस्मिन् दिने रात्रौ सुप्तेषु गृहजनेषु हरिशर्मा जामातृवाहनं हयं स्थूलदत्तभवनात् अपहृत्य तं दूरे प्रच्छन्नं स्थापितवान्। परेद्युः प्रातः सेवकाः इतस्ततस्तं तुरगम् अन्विष्यन्तः अपि न अलभन्त।

(i) हरिशर्मा भूपतिं नीत्वा किं दर्शितवान् ? किम् अभणत् ? [2]

(ii) हरिशर्मा कः ? कुटुम्बनिर्वहणार्थं सः किं करोति स्म ? [2]

(iii) जिह्वा किमर्थं कम्पिता ? [3]

(iv) हरिशर्मा किमर्थं स्वस्य बाल्यं स्मृतवान् ? किमवदत् ? [3]

### आचार्य देवो भव

**Question 6**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

आचार्यः न केवलं लौकिकविषयान् बोधयति परन्तु बोधनसमये छात्रेभ्यः सदाचारस्य, सम्यक् वाचः, सम्यक् आलोचनस्य अपि विशेषं गमनं ददाति। आचार्यस्य प्रत्येकं क्रिया छात्रे तीव्रं प्रभावं करोति। अतः आचार्यस्य सम्मानः अस्माभिः अवश्यमेव करणीयः।

(i) मानवः स्वजीवने कैः सह संसर्गं करोति ? किमर्थं तेषाम् उपकारः अविस्मरणीयः ? [2]

(ii) अध्यापकः सदा कस्मिन् कार्ये तत्परः भवति ? [2]

(iii) गुरुः किं वाञ्छति ? कथं सन्मार्गम् उपदिशति ? [3]

(iv) किमर्थम् आचार्यस्य सम्मानः कर्तव्यः ? [3]

## अस्माकं देश:

**Question 7**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

भारतस्य स्थानं विश्वस्य सर्वेष्वेव देशेषु प्राचीनतमं विशिष्टतमं च अस्ति। भारतस्य उत्तरदिशायां हिमालयपर्वतादारभ्य दक्षिणस्यां दिशि कन्याकुमारीपर्यन्तं विस्तृतं वर्तते। उत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराज: अस्य शिरसि हिमरजतमुकुटमिव सुशोभते। स: प्रहरीव भारतं रक्षति।

(i) हिमालय: कथं सुशोभते ? सागर: किं करोति ? [2]

(ii) भौगोलिकरीत्या भारतस्य सीमां वर्णयत। अस्मिन् विषये का उक्तिरस्ति ? [2]

(iii) भारतस्य शासनपद्धति: कीदृशी इति लिखत। [3]

(iv) भारतस्य प्राकृतिकसौन्दर्यं वर्णयत। किं जनानां चेतांसि आकर्षयति ? [3]

## संस्कृतवाणी भाग—5

## युक्ति: शक्ते: गरीयसी

**Question 8**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

लोकहिताय कुत्सितानां नृशंसानां कृत्यानाम् अन्तम् अनिवार्यम्। अस्मिन् लोके निर्भयेन सुखेन च जीवितुं बलिष्ठात् शरीरात् तीक्ष्णबुद्धि: चातुर्यं च आवश्यकम्। विना बुद्धिशक्तिं सुदृढशरीरेण किम् ? ध

(i) कुशाल: किमर्थं वनं प्राविशत् ? [2]

(ii) ग्रामीणजना: किमर्थं दु:खिता: आसन् ? [2]

(iii) 'त्वां ग्रहीतुम् आगत: अस्मि' इति कुशालस्य वचनं श्रुत्वा राक्षस: किम् अवदत् ? [3]

(iv) राक्षस: दीनस्वरेण कुशालं किं प्रार्थितवान् ? [3]

## अमृतवाहिनी

**Question 9**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

सुभाषितं नाम सुवचनम् इत्यर्थः। संस्कृतवाङ्मये सुभाषितानां महत्त्वं स्थानं वर्तते। बहवः सुभाषितकाराः बहूनि सुभाषितानि रचितवन्तः सन्ति। तानि अस्मान् व्यवहारचातुर्यं बोधयन्ति। तत्त्वं च उपदिशन्ति।

(i) खलसाध्वोः भेदः कः ? [2]

(ii) पुराकृतानि पुण्यानि कदा मानवान् रक्षन्ति ? [2]

(iii) पुरुषस्य परं निधानं किम् ? उदाहरणसहितं विवृणुत। [3]

(iv) कः पशुः भवति ? पशूनां भागधेयमपि किम् ? [3]

## चतुरः रामकृष्णः

**Question 10**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

रामकृष्णः व्याधिग्रस्तानां जनानां चिकित्सां करोति स्म। एतदर्थम् औषधम् आनेतुं वनं गच्छति स्म। एकदा सः औषधीयवस्तूनि आनेतुं वनं गतः। तस्मिन् वने नरभक्षकाः अपि अवसन्।

(i) नरभक्षकाः स्वनायकं किमपृच्छन् ? [2]

(ii) रामकृष्णः किमर्थं वनं गतः ? [2]

(iii) विकटकविः कः ? सः किं कृत्वा पारितोषकानि लभते स्म ? [3]

(iv) नायकः रामकृष्णं प्रति किं प्रत्यवदत् ? [3]